IJFANS INTERNATIONAL JOURNAL OF FOOD AND NUTRITIONAL SCIENCES
ISSN PRINT 2319 1775 Online 2320 7876
*Research Paper* **© 2012 IJFANS. All Rights Reserved**, UGC CARE Listed ( Group -I) Journal Volume 07, Iss 04, 2018

# श्रीशङ्करभगवत्पादानां सर्गात्मकरचनावैभवः

**Dr. A Manoj Kumar**
Asst.Professor in Vedanta
Calicut Adarsha Vidyaapeetha, Balussery
Mail Id: mk319102@gmail.com

वैदिकसाहित्यादारभ्य इतिहासपुराणदर्शनादीनां व्याकरणन्यायमीमांसादीनां शास्त्रग्रन्थानां काव्यनाटकादीनामुपलब्ध्या संस्कृतभाषयाः तदाश्रितायाः संस्कृतेश्च चिरपुरातनत्वं चिरस्थायित्वं च स्पष्टमवगन्तुं शक्यते। यावत्स्थास्यन्ति गिरयः तावद्रामायणमहिमेति वाक्यमिममेवार्थं सूचयति खलु। एवं सर्गात्मकरचनायाः मूर्तोदाहरणं भवति संपूर्णसंस्कृतवाङ्मयः। परसहस्रवर्षाण्यधीत्यापि वार्धक्यसहजः शक्तिक्षयः न दृश्यते कुत्रापि। अतः एव निःसङ्कोचमस्माभिरद्यापि उच्यन्ते- "तत्वमसि"[1], "अहं ब्रह्मास्मि"[2], "वसुधैव कुटुम्बकम्", "आचार्यवान् पुरुषो वेद"[3], "उत्तिष्ठत जाग्रत प्राप्यवरान्निबोधत"[4], "आत्मैव ह्यात्मनोबन्धुरात्मैव रिपुरात्मनः"[5], "स्वधर्मै निधनं श्रेयः परधर्मो भयावहः[6]" इत्यादीनि लौकिकानि वैदिकानि वा वाक्यानि। यथा नदीषु उपलभ्यमानाः शिलाखण्डाः कथं सुखस्पर्शकाः हृद्याः भवन्ति बहुकालप्रवाहपातेन, एवं संस्कृते उपलभ्यमानाः भूरिशः कृतयः बहुकालप्रावाहे अपि संशुद्धाः सर्गात्मकाः भवन्ति। कालदेशभाषातीतस्वीकार्यता सर्गात्मकरचनायाः एव सिद्ध्यति। एवं पाश्चात्येषु पौरस्त्येषु वा दार्शनिकेषु श्रीशङ्कराचार्यस्य परमाचार्यत्वं श्रीशङ्करकृतीनां प्रामाण्यत्वं श्रीशङ्करतत्वानां प्रचारश्चाभवत्।

## श्रीशङ्करदर्शनम्

भारतीयदर्शनस्य स्थानं विश्वदर्शनेषु सुतरां वर्तते। दर्शनानां उदयः उपनिषत्सु एव दृश्यते। आस्तिकनास्तिकभेदेन प्रमाणप्रमेयभेदेन च दर्शनेषु बहुमुखत्वं दृश्यते। तथापि उपनिषद्दर्शनस्य प्रसक्ति अधिका वर्तते। श्रीशङ्करस्याविर्भावेन दर्शनमित्युक्ते वेदान्तदर्शनस्य तथा दार्शनिकः इत्युक्ते श्रीशङ्करस्य च रूपं स्मृतिपथमायाति। यतो हि वैदिकसाहित्यस्य सूत्रग्रन्थस्य स्मृतिग्रन्थानां च याथात्म्यं श्रीशङ्करप्रभृतीनां व्याख्यातृणामभावे अस्पष्टमेवाभविष्यत्। विषयस्य काठिन्यात् अनवबोधात् अन्यथाग्रहणात् वा दर्शनपद्धत्यायाः परित्यागः इतरसम्प्रदायाश्रयणं स्वधर्मपरित्यागः इतरधर्मावलंबनं वा अभविष्यत्। तदानीमेव प्रस्थानत्रयाणां प्रसन्नगम्भीरभाष्यरचनया तस्य व्याख्यानप्रचारणेन लघूनां प्रकरण-उपदेश-स्तोत्रग्रन्थानां रचनया च उपनिषद् दर्शनस्य प्रसिद्धिं पुनः संस्थापयामास। ततःपरं द्वैतविशिष्टाद्वैतादि प्रकारान्तरेण दर्शनपद्धतिरपि उत्तरोत्तरं वृद्धिं याति ।

---

[1] छान्दोग्योपनिषद् 6.8.7
[2] बृहदारण्यकोपनिषद्.1.4.10
[3] छान्दोग्योपनिषद् 6.14.2
[4] कठोपनिषद् 1.3.14
[5] भगवद्गीता. 6.5
[6] भगवद्गीता, 3.35

ISSN PRINT 2319 1775 Online 2320 7876
*Research Paper* **© 2012 IJFANS. All Rights Reserved**, UGC CARE Listed ( Group -I) Journal Volume 07, Iss 04, 2018

मानवसाहित्यानां सर्वेषां परमं तात्पर्यं किं भवति? किमुद्दिश्य तानि सर्वाणि प्रवर्तन्ते इत्यादि प्रश्नानाम् एकमेव उत्तरं भवति "तत्वमसि"[7] इति। जायन्ते म्रियन्ते यद्यतार्जयते कालान्तरे नश्यति, पुनः किं उद्दिश्य भवन्ति सर्वाः प्रवृत्तयः? जन्म कर्मफलोपभोगाय,भोगस्तु बन्धाय,रोग-मरण-दुःख-रूप-अनर्थाय –संसारचक्राय भवन्ति इति साक्षात् उत्तरं न तृप्तिं जनयति। एतादृशस्य सार्वजनीनस्य सार्वलौकिकस्य प्रश्नस्य उत्तरमेकं प्रददाति तत्वज्ञानात् मर्त्यः तृप्तः भवति इति। "तत्वज्ञानात् निश्रेयसाधिगमः"[8], "विद्यया अमृतमश्नुते"[9], "विद्यया विन्दते अमृतम्"[10] , "तरति शोकमात्मविद्"[11] इत्यादीनि वचांसि याथात्म्यज्ञानेन सत्यासत्यविवेकादेव परमपुरुषार्थप्राप्तिरिति कथयन्ति। अखण्डानुभवः भेदबुद्धिनिवारकः इति लौकिकदृष्टान्तेन निद्रायाः सुखतमत्वं अनुभवन्तः वयम्। सुखमेव सर्वेषामात्यन्तिकं लक्ष्यं तत् तु अत्मैक्यबोधेनैव भवति। अतः आत्मतत्वप्रतिपादकं वेदान्तशास्त्रं सर्वेषाणां शास्त्राणां उपकर्यं शास्त्रमित्युच्यते, इतराणि शास्त्राणि उपकरकाण्येव भवन्ति।

**आचार्यस्य प्रधानकृतयः**

ईशादिदशोपनिषदां ,भगवद्गीतायाः ब्रह्मसूत्रस्य प्रस्थानत्रयाणां भाष्यरचानया च वेदान्तसिद्धान्तस्य समर्थनमभवत्। भाष्यसंन्दर्भे प्रत्येकस्य विषयस्योपस्थापनावसरे तत्र तत्र जायमानान् संशयान् उत्थाप्य तत्र पूर्वपक्षाणामाशङ्कां श्रुतियुक्तिबलेन परिहृत्य स्वसिद्धान्तं समर्थयन्ति। तदर्थं प्रयुक्ता भाषा शैली युक्तिश्च अन्यादृशः भवति। अत एव तत्वशास्त्रजिज्ञासवः भाष्यग्रन्थान् भाष्यप्रबन्धान् वा आश्रयन्ते। आचार्यकृतिमानाश्रित्य भारतीय दर्शनस्य पूर्णं पठनं न संभवत्येव , तावद्विपुलः भवति श्रीशङ्करस्य रचानावैभवः।

प्रस्थानत्रयभाष्यमिव सनत्सुजातीयभाष्यं हस्तामलकीयभाष्यं अध्यात्मपटलभाष्यमित्यादीनि अस्य कर्तृत्वेनोपलभ्यन्ते। आत्मबोधः अपरोक्षानुभूतिः उपदेशसाहस्री दशश्लोकी प्रभृतयः बहवः प्रकरणग्रन्थाः, सौन्दर्यलहरी शिवानन्दलहरी दक्षिणामूर्तिस्तोत्रमित्यादीनि स्तोत्रकाव्यानि च परशतग्रन्थाः उपनिषत्सिद्धान्तस्य समर्थकाः भवन्ति।

श्लोकार्धेन प्रवक्ष्यामि यदुक्तं ग्रन्थकोटिभिः।
ब्रह्मसत्यं जगन्मिथ्या जीवोब्रह्मैव नापरः।।

इति प्रसिद्धा पङ्क्तिः वेदवेदान्तेतिहासपुराणानां शास्त्रान्तराणां च रहस्यं तत्वं अद्वैतमेवेत्युद्घोषयति।

**प्रस्थानत्रयभाष्याणां रचनाचातुर्यम्**

[7] छान्दोग्योपनिषद् 8.1.6
[8] न्यायसूत्रम् 1
[9] ईशावास्योपनिषद् 11
[10] केनोपनिषद् 2.4
[11] छान्दोग्योपनिषद् 7.1.3

*Research Paper* **© 2012 IJFANS. All Rights Reserved**, UGC CARE Listed ( Group -I) Journal Volume 07, Iss 04, 2018

११८० शाखाभेदासूपनिषत्सु ईशावास्यादि बृहदारण्यकान्तानां दशानां प्राधान्यं विषयस्याधारेण भवति, तथापि आचार्यस्य भाष्ययुक्तत्वात् ताः सर्वाः प्रसिद्धाः अभवन्। परमपुरुषार्थः मोक्षः आत्मैकत्वविज्ञानेन साध्यः इति श्रीशंकरस्याभिप्रायः श्रुति सम्मतः एव । वेदविहितानि कर्माणि निष्कामस्य सत्वशुद्धये तद्वारा ज्ञानसाधनत्वेन मोक्षाय आरादुपकारकाणि भवन्ति। सकामस्य दक्षिणमार्गप्रतिपत्तये पुनरावृत्तयेत्युक्त्वा तृतीयस्य स्वेच्छया अशास्त्रीयप्रवृत्या पश्वादिस्थावरन्ता अधोगतिश्च सूच्यते। 'अथ ययोः पथोर्न कतरेणचन तानिमानि क्षूद्राण्यसकृदावृत्तीनि भूतानि भवन्ति। जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं'[12] इति वाक्यविवरणे कर्ममार्गस्य ब्रह्मविचारमार्गस्य वा वेदस्य पूर्वापरसंबन्धः उपोद्घातभाष्ये स्पष्टं प्रतिपद्यते।

श्रीशङ्करस्य सिद्धान्तः क इति ज्ञातुं कस्याप्युपनिषदः भाष्यावलोकनेन शीघ्रं शक्यते। यथा 'ईशादि मन्त्राः कर्मस्वविनियुक्ताः तेषामकर्मशेषस्यात्मनो याथात्म्यप्राकाशकत्वात्, याथात्म्यं चात्मनो नित्यत्वेकत्वाशरीरत्वादिलक्षणं, तच्चकर्मणा विरुद्धं' इति भाष्यवचनम्। 'किं प्रजया करिष्यामो येषां नोयमात्मायं लोकः'[13] इत्यादि वाक्यव्याख्यानसन्दर्भे कर्मण अनपेक्षत्वं ज्ञानस्यैवेकोपायत्वम् दृढमुच्यते भाष्याणां विभिन्नेषु सन्दर्भेषु। यस्य कस्याप्युपनिदः शङ्करभाष्याध्ययनेन सुस्पष्टमवगम्यते यत् कर्मणा कर्मसमुच्चयेन वा मोक्षो न सिद्ध्यति , तत्तु आत्मैकत्वविज्ञानादेवेति।

श्रीमद्भगवद्गीतायाः भाष्यं तु द्वितीयाध्यायस्य एकादशतमश्लोकादारभ्य भवति। उपनिषद्तत्वप्रतिपादनमेव गीताशास्त्रस्यापि तत्पर्यमेवेति 'तस्मात् गीतासु केवलादेव तत्वज्ञानात् मोक्षप्राप्तिः न कर्मसमुच्चयादिति निश्चितोऽर्थेति'[14] पुनः पुनः स्मारयति। ज्ञानमेव मोक्षस्य कारणं चेत् 'ज्यायसी चेत् कर्मणस्ते.. किं कर्मणि घोरे मां नियोजयसि केशव'[15] इति पृष्टे-तवाधिकारः कर्मयोगे एवेत्युक्त्वा अधिकारिभेदेन भिन्नं मार्गं उपदिशन्ति। एवं ज्ञानाङ्गतया कर्म उपासना भक्तिश्च प्रतिपाद्यन्ते।

आतिप्राचीनानाम् गहनानां बादरायणसूत्राणाम् तात्पर्यं विषयवैपुल्यं च अवगन्तुं भाष्यस्यानिवार्यता अस्ति एवं यथा मीमासादर्शनमित्युक्ते पूर्वमीमासायाः रूढिः तथा वेदान्त इत्युक्ते शङ्करवेदान्त इति ख्यतिरभवत्। समन्वयाद्यद्यायेषु घटितानं सूत्राणाम् पौर्वापर्यसम्बन्धः नैरन्तर्यार्थं भाष्यसाहाय्येनैव स्पष्टं भवति। 'युष्मदस्मत्प्रत्ययगोचारयोः विषयविषयिणो'[16] इत्यादि भाष्यभागाः सर्वेषां वेदान्तछात्राणां मनसि आदावेव स्थानं भजति। पुनः पुनः विवरणभामत्यादि व्याख्योपाख्यैः एकैकस्य भाष्यवचनस्य महत्वं अर्थप्रकाशनसामर्थ्यं च अवगन्तुं शक्यते। सूत्रभाष्यपठनेनैव परसहस्राणां श्रुतिवाक्यानां सान्दर्भिकोपयोगाः श्रुतिवाक्यानां तात्पर्यं च स्मृति युक्ति लौकिकदृष्टान्तेन च अवगन्तुं

[12] छान्दोग्योपनिषद् 5.10.8
[13] बृहदारण्यकोपनिषद् 4.4.22
[14] भगवद्गीता 2.11
[15] भगवद्गीता 3.1
[16] ब्रह्मसूत्रभाष्यम् 1

ISSN PRINT 2319 1775 Online 2320 7876
Research Paper © 2012 IJFANS. All Rights Reserved, UGC CARE Listed ( Group -I) Journal Volume 07, Iss 04, 2018

शक्यते। अत्याधुनिकगवेषणरीतिमवलम्ब्य सुसज्जीकृतस्य प्रबन्धस्य उत्तमा रीतिः सुत्राभाष्ये दृष्टुं शक्यते। लक्षणयुक्तः अनुसन्धानप्रबन्धाः भवति श्रीशंकरकृतं सुत्रभाष्यम्। उपनिषत्प्रयुक्तानां केषांचनपदानां उदाहरतया मातरिश्वा, विष्णुः, देवः, प्राणः, आत्मा, विद्या, अविद्या, अमृतं, पुरुष इत्यादीनां विशेषार्थावगमः भाष्यसाहाय्येनैव संभवति। उपनिषत् शब्दव्युत्पत्तिः कठोपनिषद्भाष्ये सविस्तरं प्रतिपाद्यते। प्रसिद्धानां दृष्टान्तानां सान्दर्भिकोपयोगाः विषयावागाहाय अत्यन्तोपकारकाः भवन्ति। द्विचन्द्रदृष्टान्तः घटाकाशदृष्टान्तः, घटमृत्तिकादृष्टान्तः, रज्जुसर्पदृष्टान्तः, जलराशौजलबिन्दुदृष्टान्तः, चन्दनागरुदृष्टान्तः, शुक्तिरजतदृष्टान्तः आदयः सिद्धान्तं बोधयितुं परमप्रधानाः भवन्ति। विषयस्फुटीकरणाय बहूनां लौकिकन्यायानाम् उल्लेखाः भाष्यग्रन्थेषूपलभ्यन्ते। बीजाङ्कुरन्यायः, अरुन्धतीनक्षत्रन्यायः, समुद्रतरंङ्गन्यायः, ब्राह्मणपरिव्राजकन्यायः, इषुकारन्यायः, विष्णुप्रतिमान्यायः, स्थूणानिखननन्यायेति एवादृशानां न्यायानां प्रतिपादनात् विषयाणां स्पष्टावगतिर्भवति। 'हंसः शुचिषद्वसुरन्तरीक्षसद्धोतावेदिषन्नृषद्वरसद्व्योमसदब्जागोजाऋतजाद्रिजा-बृहत्'[17] इत्यादीनां मन्त्राणां अर्थावगमनं भाष्यं विना क्लेशकरं भवति। तथा 'अन्यदेवतद्विदितादथोऽविदितादधि' इति उपनिषद्वाक्यं भाष्यसाहाय्यं विना दुर्ग्रहमेव भवति।

## आचार्यस्य भाषाप्रयोगचातुर्यम्

भाष्यसन्दर्भेषु आचार्यस्य भाषारीतिः वेदान्त विषयस्यास्पष्टतां क्लिष्टतां अपनयति यथा 'अनेजदेकं मनसोजवीयो तदेजति तन्नैजति'[18] इत्यादि विरुद्धोक्तिः किमर्था इत्याकाङ्क्षायां निरुपाधिकत्व सोपाधिकत्वेन अविरोधं बोधयति। एवमेव 'तद्दूरे तद्वन्तिके' त्यस्मिन् कथं दूरत्वमन्तिकत्वं चैकस्यात्मनः इति सन्देहे वर्षकोटिशतैरप्यज्ञानीनांतदप्राप्यत्वात् दूरे, ज्ञानीनां प्रत्यगात्मत्वात् अन्तिकेति च उत्तमभाषाप्रयोगेण वा तात्पर्यं बोधयति ।

प्रकरणग्रन्थेषु प्रश्नोत्तररीत्या यथा 'कथं तरेयं भवसिन्धुमेतत् '[19] कुतः आयातः? कुत्रचमे गतिः? को नाम बन्धः? कथं वा मुक्तिः? इत्येवं प्रश्नोत्तररीत्य विषयस्योपस्थापनं क्रियते। 'सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुतानिर्वचनीयरूपा'[20] इत्ययं श्लोकः अनिर्वचनीयत्वं बोधयितुं समर्थः भवति। एकवारं पठित्वा तन्निमिषे एव हृदिस्थः भवति। विषयाणां अनर्थहेतुत्वम् स्पष्टयितुं विवेकचूडामण्यां लभ्यते - 'शब्दादिभिः पञ्चभिरेव

[17] कठोपनिषद् 2.2.2
[18] ईशावास्योपनिषद् 4.5
[19] विवेकचूडामणिः 42
[20] विवेकचूडामणिः 111

Research Paper © 2012 IJFANS. All Rights Reserved, UGC CARE Listed ( Group -I) Journal Volume 07, Iss 04, 2018

पञ्चपञ्चत्वमापुः...... भृङ्गानरः पञ्चभिराञ्चितः किं '[21] इति तथा विषयविषास्वादः विषसर्पभयादपि भयङ्करः यतः विषयास्वादमोहः मणिमन्त्रौषधादिना न निवार्यः एवं लघुलघुश्लोकैः वेदान्तचिन्तामुत्पादयन्ति । कस्त्वं कोऽहं कुतः आयातः का मे जननी को मे तात इति गुरुशिष्योपदेशरीत्या तत्वोपदेश प्रक्रिया भवति।' जाग्रत्स्वप्नसुषुप्तिषुस्पुटतरा यासंविदूज्जृम्भते ...... सैवाहं न च दृश्यवस्त्विति[22]" इत्यादि मनीषापञ्चकम् कियत् मनोहरम् तत्वप्रदिपादनपरं च भवति। वेदान्त सिद्धान्तानां सारसंग्रहरूपं भवति खलु एकैकः श्लोक एकैकं वाक्यं वा। 'न भूमिर्नतोयं न तेजो न वायु .....तदेकोऽवशिष्टशिवकेवलोऽहम्', 'न वर्णा न वर्णाश्रमाचारधर्मा'[23], 'अरूपं तथा ज्योतिराकारकत्वात्'[24] इत्यादि वचनम् अद्वैततत्वं स्पष्टं बोधयति।

'वदन्तु शास्त्राणि यजन्तु देवान् कुर्वन्तु कर्माणि भजन्तु देवता आत्मैक्यबोधेन विना विमुक्ति न सिद्ध्यति ब्रह्मशतान्तरेऽपि' [25] इत्यनेन श्लोकेन इतरेषां मार्गाणां निरर्थकत्वं आत्मज्ञानस्यैव मुक्तिकारणत्वं च प्रतिपादयति। 'प्रणायामशातेन च', 'नहि नहि रक्षति डुकृञ् करणे', 'गभीरे कासारे विशति विजने घोरविपिने विशाले शैले भ्रमति कुसुमार्थं जडमतिः .... सुखेनावस्थातुं जन इह न जानाति किमहो '[26] आदिषु वाक्येषु इतर तत्वावलम्बीनाम् अप्रसक्तताम् अयुक्ततां च प्रदर्श्य निर्दुष्टं स्वसिद्धान्तं समर्थयन्ति। 'बालस्तावत्क्रीडासक्तः' नलिनीदलगतजलमतितरलं तद्वज्जीवितमतिशयचपलं विद्धिव्याध्यभिमानग्रस्तं लोकं शोकहतं च समस्तम्'[27] इत्यादि वाक्यानि आबालवृद्धं जनहृदयं प्रविशन्ति, एतादृशानां प्रशस्तानां वाक्यानां पूर्णतया अपरिचितः जनसमूहः लोके कुत्रापि न स्यात्, तावत्प्रचुराः प्रयोगाः भवन्ति। आचार्येण अप्रविष्टाः दार्शनिकांशाः न भवन्तीति मन्ये, तावद्विपुला खलु आचार्यस्य ग्रन्थराशिः। एवं वेदान्तसिद्धान्तप्रबोधने असाधारणपाण्डित्यं बुद्धिसामर्थ्यं शास्त्रकौशलम् , इतरविषयाणां ज्ञानं तथा सुमधुरभाषाप्रयोगः, सारल्येनप्रतिपादनं, गद्यपद्यरीत्या छन्दोऽलङ्कारसहितया शैल्या च आचार्यकृतिषु सहस्राधिकपूर्वकालिकत्वं न प्रतिभाति। स्व मातृ पितृ आचार्यवचनमिव सर्वसंमतिः आचार्यकृतिषु ,आचार्यस्य जगतगुरुपदं च अभवत्। दार्शनिकचिन्तासंदर्भे पश्चात्कालीनानां विषयाणां नूतनत्वं नास्ति, श्रीशंकरमाश्रित्य एव वेदान्तस्य प्रगतिर्भवति। 'जयति भगवद्पाद श्रीमन् मुखाम्बुज निर्गताजननहरिणीसूक्तिः'[28] इति वचनम् सार्थकं भवति।

***********

[21] विवेकचूडामणिः 78
[22] मनीषापञ्चकम् 1
[23] दशश्लोकी 2
[24] दशश्लोकी 6
[25] विवेकचूडामणिः 6
[26] शिवानन्दलहरी 9
[27] मोहमुद्गरम् (भजगोविन्दम्) 4
[28] सिद्धान्तलेशसङ्ग्रहः 1


IJFANS International Journal of Food And Nutritional Sciences

ISSN PRINT 2319 1775 Online 2320 7876
Research Paper © 2012 IJFANS. All Rights Reserved, UGC CARE Listed ( Group -I) Journal Volume 07, Iss 04, 2018

## सहायकग्रन्थसूची

**छान्दोग्योपनिषद्** - शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**बृहदारण्यकोपनिषद्** - शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**कठोपनिषद्** - शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**छान्दोग्योपनिषद्** - शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**ईशावास्योपनिषद्** - शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**केनोपनिषद्** - शाङ्करभाष्ययुता, श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृता, मोतिलालबनारसीदास, वाराणसी, सं.१९८७

**न्यायसूत्रम्** – महर्षिगौतमप्रणीतम्, सम्पादकः डा. महेशभट्टः, चौखम्बा संस्कृतसीरिज (वि.सं. २०६९)

**भगवद्गीता** – शाङ्करभाष्यसहिता, गीताप्रेस गोरखपुर, सं.वि.सं.२०७०

**ब्रह्मसूत्रम्** – सटिप्पणं मूलमात्रम् – चौखम्बा विद्याभवन, १९९८।

**विवेकचूडामणिः** – शङ्कराचार्यविरचिता – अरविन्दानन्दयतिना प्रणीता अद्वैतामृतबोधिन्याख्यटीकायुता, चौखम्बा विद्याभवन, १९९८

**मनीषापञ्चकम्** – शङ्कराचार्यविरचितम्, श्रीनृसिंहाश्रमप्रणीतमधुमञ्जरीसंस्कृतटीकासंवलितम्, डा.लक्ष्मीकान्तविमलः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०१६

**दशश्लोकी** - शङ्कराचार्यविरचिता, श्रीशङ्करग्रन्थावली (स्तोत्राणि) No. 1, Samatha Books, Madras, 1981

**शिवानन्दलहरी** - शङ्कराचार्यविरचिता, श्रीशङ्करग्रन्थावली (स्तोत्राणि) No. 1, Samatha Books, Madras, 1981

**मोहमुद्गरम् (भजगोविन्दम्)** - Minor Works of Sree Sankaracharya Edited by H.R. Bagavat, Chaukhamba vidyabhavan, 2007

**सिद्धान्तलेशसङ्ग्रहः** - अप्पय्यदीक्षितः, वेदान्ताचार्य पं. श्रीमूलशङ्करव्यासविरचितेन सटिप्पणभाषानुवादेन समलङ्कृतः, भारतीय बुक् कार्पोरेशन्, दिल्ली, सं. 2005.

***********